| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ। चूर्णोदानम्। | दक्षिणा। |
|---|---|---|---|---|
| | वैकल्पिकं चतुर्विंशतिवार्षिकव्रतम्। एतद्ब्राह्मण्यापि करणीयम्। | ३६० धेनवः। | १०८० कार्षापणाः। | २०० गावः। अशक्तौ २०० कार्षापणाः। |
| वैश्यस्याज्ञानतो ब्राह्मणीगमनम्। | नववार्षिकव्रतम्। ज्ञानाद्द्वैगुण्यम्। ब्राह्मण्यापि एतत् कार्य्यम्। | १३५ धेनवः। | ४०५ कार्षापणाः। | ७५ गावः। अशक्तौ ७५ कार्षापणाः। |
| क्षत्रियस्याज्ञानतो ब्राह्मणीगमनम्। | षाड्वार्षिकव्रतम्। ज्ञानाद्द्वैगुण्यम्। ब्राह्मण्यापि एतत् कार्य्यम्। | ९० धेनवः। | २७० कार्षापणाः। | ५० गावः। अशक्तौ ५० कार्षापणाः। |
| यद्यपि शूद्रस्य ब्राह्मणीगमनं महापातकत्वेन तथा क्षत्रियवैश्ययोर्ब्राह्मणीगमनमनुपातकत्वेन चोक्तं तथाप्यनुलोमगमनं तावदुपपातकमेव तत्प्रसङ्गादसवर्णत्वेन प्रतिलोमस्त्रीगमनप्रायश्चित्तमप्युक्तमतो न वैषम्यमिति। | | | | |
| शूद्रस्याज्ञानतः क्षत्रियागमनम्। | नववार्षिकव्रतम्। ज्ञानाद्द्वैगुण्यम्। क्षत्रियाया अप्येतत्। | १३५ धेनवः। | ४०५ कार्षापणाः। | ७५ गावः। अशक्तौ ७५ कार्षापणाः। |
| वैश्यस्याज्ञानतः क्षत्रियागमनं शूद्रस्याज्ञानतो वैश्यागमनञ्च। | नवमासाधिकषाड्वार्षिकव्रतम्। ज्ञानाद्द्वैगुण्यम्। क्षत्रियाया वैश्यायाश्चाप्येतत्। | १०२ धेनवः। | ३०३॥० कार्षापणाः। | ५७ गावः। अशक्तौ ५६।० कार्षापणाः। |
| अथ समोत्तमवर्णद्वित्रिपुरुषव्यभिचरितसवर्णासवर्णस्त्रीगमनम्। | | | | |
| तत्र ब्राह्मणस्य समोत्तमवर्णद्वित्रिपुरुषव्यभिचरितशूद्रागमनम्। | सकृद्गमने मासार्द्धं गोमूत्रसिद्धयावकपानम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | अभ्यासे मासं गोमूत्रसिद्धयावकपानम्। | २ धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| ब्राह्मणस्य समोत्तमवर्णद्वित्रिपुरुषव्यभिचरितक्षत्रियागमनम्। तथाविधवैश्यागमनञ्च। | सकृद्गमने सान्तपनम्। अभ्यासे प्रायश्चित्तावृत्तिः। | २ धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| अथ चातुर्वर्ण्यस्वैरिणीगमनम्। स्वैरिणी चतुःपुरुषगामिनी। सा द्विविधा। केनचिदनवरुद्धा अवरुद्धा च। | ब्राह्मणस्य स्वैरिण्या ब्राह्मण्या गमने त्रिरात्रोपवासः ब्राह्मणाय मृगाजिनदानञ्च। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | तथाविधक्षत्रियाया गमने त्रिरात्रोपवासः धनुर्दानञ्च। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | तथाविधवैश्याया गमने त्रिरात्रोपवासः अयःशिलादानञ्च। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | तथाविधशूद्राया गमने त्रिरात्रोपवासः उदकुम्भदानन्तथा संमार्जनीदानञ्च। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| ब्राह्मणस्य शूद्रान्त्यजादिगामिस्वैरिणीगमनम्। | द्वादशवार्षिकव्रतम्। क्षत्रियादौ पादपादहानिः। विमातृस्वैरिणीचाण्डालस्वैरिणीगमनेऽप्येवम्। सर्व्वत्राभ्यासे द्वैगुण्यम्। | १८० धेनवः। | ५४० कार्षापणाः। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| ब्राह्मणबन्धकीगमनम्। बन्धकी चात्र स्वभर्तृव्यतिरिक्तपञ्चपुरुषगामिनी। | कमण्डलुदानम्। | ० | ० | यथाशक्ति। |
| क्षत्रियबन्धकीगमनम्। | आयुधदानम्। | ० | ० | यथाशक्ति। |